# अथ पापविमोचनस्तोत्रम्

सुकृतं तिलमात्रतुल्यमीश क्रियते नैव मयैकवत्सरेऽपि ।
अपि तु क्रियते सदाघपूगः प्रतियामं सकलेन्द्रियैर्मुकुंद ॥१॥

न शिरश्चलतीश मे कदाऽपि श्रुतिजानंदभरेण सद्गुणानाम् ।
अपि तु प्रभुबंधुदुर्गुणानां श्रवणार्थं चलितं भवत्यशंकम् ॥२॥

श्रवणे श्रवणाय सत्कथाया न यतेते तव पुण्यकीर्तनस्य ।
अपि तु व्यभिचारलोकवार्ताश्रवणायैव महादरं प्रयातः ॥३॥

न ममाक्षियुगं प्रवर्तते श्रीभगवच्छास्त्रकुलावलोकनाय ।
अपि तु ध्रुवबालनर्तकीनां गणिकानां परिनर्तनादिदृष्ट्यै ॥४॥

न हि नासिकया कदापि विष्णोः पदपद्मार्पितपुष्पगंधबुद्धिः ।
कमलेश भवामि किंतु विष्णोश्चरणानर्पितपुष्पगंधबुद्धिः ॥५॥

नृहरेऽच्युतमाधवेशकृष्णहरिगोविंदमुकुंदनामजातम् ।
न हि कीर्तयतीह मे कुजिह्वाऽपि तु दुर्लिंगभगांकितान् कुशब्दान्॥

तव मंदिरमार्जनादिसेवां न करौ मे कुरुतः कदापि भक्त्या ।
अपि तूरुगुणार्य दुष्टवस्तुग्रहणायैव यतेत इंदिरेश ॥७॥

उदरं मम धिक् शठस्य विष्णवर्पितपूतान्नविवर्जितं नितांतम् ।
यदपूततरासमर्पणीयाधमवृन्ताकपलांडुपूर्वभाजः ॥८॥

खलजारवधूगृहाणि नित्यं चरणाभ्यामनुयाम्यहं त्वराभ्याम् ।
न तु माधव तावकालयांश्च प्रतियामीश महत्तमाग्रहोऽहम् ॥९॥

मन एव हरेऽखिलेंद्रियाणां वरमित्थं प्रमितं श्रुतिस्मृतिभ्याम् ।
सुमनोजयिनोऽखिलेंद्रियाणां जय एवेति जनानुभूतिरस्ति ॥१०॥

मनसाच्युत कृष्ण तादृशेनाप्यनुचिंत्यैव भवंतमात्मभक्तान् ।
भववारिनिधेः सुतारयंतं भववार्धिं न हि तर्तुमस्ति यत्नः ॥११॥

मम पापचयस्य वासुदेवांतकलोकस्थितिरेव चेत् फलं तु ।
न सुखी सदृशोऽस्ति मे त्रिलोक्यां फलभावेन महत्तमोऽस्ति सिद्धम्

न सुखानुभवाय पापकर्माण्यहमीशानुदितं तनोमि किं तु ।
अघनाशयशःपरीक्षणार्थं तव नाम्ना मनुतापसिद्ध एव ॥१३॥

निजवासरुषा प्रदातुमार्तिं ह्यधिकां पापनियामकासुरेभ्यः।
अशुभान्यपि कारयन्मया त्वं रमसे सर्वनियामको विभासि ॥१४॥

यदि कृष्ण कदाचनापि पुण्यं घटते पापमयस्य मेऽपि तत्तु ।
प्रबलाघचयैर्निहन्यते वा दुरितध्वंसकृतार्थमीश वा स्यात् ॥१५॥

तदिहोभयतश्च पुण्यमूर्ते सुकृतं नो घटते मनागपीश ।
वद मे पुरतस्त्वतीव भीरोर्भगवन् कालभयापहर्त्युपायम् ॥१६॥

अतुलं नृषुवैष्णवं सुजन्माच्युतदत्तं कृपया त्वयाऽप्यवाप्य ।
क्षणजीव्यपि कल्पगत्वबुद्ध्या पशुचंडालवदेव संचरामि ॥१७॥

न तदस्ति शरीरिणां शताब्दायुषि शास्त्रप्रथितेऽपि किंचिदेव ।
भगवन् खलु सर्वरात्रिकालो जलहोमोपमतामुपैति नालम् ॥१८॥

द्विदशाब्दयुगं दिवाऽपि पूर्वोत्तरमीशार्भकभाववार्धकाभ्याम् ।
समयं प्रणयामि सर्वरोगैर्बहुलीलाभिरपि प्रमूढबुद्ध्या ॥१९॥

परिशेषित ईश मध्यकालः सुकृते भारतभूतले वरिष्ठः ।
यदिहापि सदैव पापचित्ते मयि पश्यंत्यजयोश्च कोऽपराधः ॥२०॥

इह भारतभूतलेऽतिपुण्ये द्रविणस्त्रीसुतपूर्वकेषु मायाम् ।
अलमेकदिनं विमुच्य वा मे तव पादाब्जरतिं प्रदेहि देव ॥२१॥

रमयाऽप्यगणय्यवस्तुजातं द्विविधं प्राहुरमंदबुद्धिभाजः ।
तव सद्गुणजातमेकमन्यन्मम दुर्वारदुरंतपापजातम् ॥२२॥
अतिसौख्यकराण्यलं परस्तात् न हि किंचित् श्रमसाध्यसाधनानि ।
श्रमभीरुरहं त्यजन् परत्रामितशोकानुभवी कथं भवामि ॥२३॥

भुवि यद्यपि पापिनो वसंति श्रमभाजः पुरुषास्तथाऽपि कोऽपि ।
मम पापसमानपापकर्ता पुरुषो नास्ति हि नास्ति नास्ति नास्ति॥

नतयो न कृताः प्रदक्षिणाश्च स्तुतयोऽपि ध्रुवमंतरेव दंभः ।
न गुरुः परिसेवितः सुभक्त्या शुभशास्त्रश्रवणं कथं ततः स्यात् ॥

वचनैर्बहुभिर्मुकुंद किं ते शृणु मे बीजवचो वदामि तुभ्यम् ।
भुवनत्रयसंस्थितानि यानीश्वर पापानि वसन्ति मय्ययोग्ये ॥२६॥

प्रकृतैतदघव्रजात् प्रमुक्तिर्न भवेत्कैरपि ते दयां विनाद्य ।
करुणां कुरु मय्यतो दयालो नतयस्ते कमलेश संत्वनंताः ॥२७॥

विजयींद्रयतीश्वरो व्यतानीत् स्तुतिमेनां दुरितापहां मुरारेः ।
परमादरतः सदा पठेद्यो निखिलैः पापचयैर्भवेत् स मुक्तः ॥२८॥

।। इति श्रीविजयींद्रयतिकृतं पापविमोचनस्तोत्रम् सम्पूर्णम् ।।